# Shri Nimbadrilakshminrisimha Suprabhatam

# શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહ સુપ્રભાતમ્

## Document Information

Text title : Shri Nimbadrilakshminrisimha Suprabhatam

File name : nimbAdrIlakShmInRRisiMhasuprabhAtam.itx

Category : vishhnu, dashAvatAra, lakShmI, suprabhAta

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

Shri Nimbadrilakshminrisimha Suprabhatam

# શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહ સુપ્રભાતમ્

કૌસલ્યા સુપ્રજારામ પૂર્વસન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાન્હિકમ્ ॥

ઉત્તિષ્ઠોત્તિષ્ઠ લક્ષ્મીશ નિમ્બાદ્રિનિલયાચ્યુત ।
ઉત્તિષ્ઠ નરહર્યક્ષ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥

માતર્વિરઞ્ચિમુખ વિશ્વચરાચરાણાં
વૈકુણ્ઠમન્દિર મનોહર દીપરેખે ।
વન્દારુભક્તજનવાઞ્છિતદાનશૌણ્ડે
નિમ્બાદ્રિનાથ દયિતે તવ સુપ્રભાતમ્ ॥ ૧॥

તવ સુપ્રભાતમખિલાર્થસાધિકે
મધુવૈરિપલિજલજાતપુત્રિકે ।
નવપુણ્ડરીકદલદીર્ઘનેત્રિકે
વર નિમ્બશૈલપતિભાગ્યજીવિકે ॥ ૨॥

વસિષ્ઠ કુમ્ભભવભવ્યતપઃપ્રભાવ
કૌણ્ડિણ્યસિદ્ધઋષયઃ કૃતકલ્યકૃત્યા ।
નૈહીં તનું તવ વિલોકયિતું પ્રવિષ્ટાઃ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૩॥

પ્રહ્લાદનારદમુખાઃ પરતત્ત્વવિજ્ઞાઃ
પ્રાતર્વિધિ પરિસમાપ્ય સમાગતાસ્તે ।
પઙ્કેરુહૈસ્તવ પદૌ પરિપૂજનાય
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૪॥

સેનેશશેષગરૂડાદિસમસ્તનિત્યાઃ
દિવ્યાનિ ભૂરિ વિરજા જલજાનિ નીત્ત્વા ।
પ્રાપ્તાસ્ત્વદીય પદપઙ્કજપૂજનાય

નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૫॥

સન્નિમ્બવૃક્ષસમુસઙ્ગિ સમીરડિમ્ભાઃ
શીતૈર્લતાન્તમકરન્દકણૈશ્ચ યુક્તાઃ ।
મન્દં પ્રવાતિ તવ કન્દરમન્દિરાન્તે
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૬॥

માર્તણ્ડમઙ્ગલકરસ્ફુટપદ્મમધ્યાત્
ભૃઙ્ગાઃ પ્રકર્ષમધુપાનવિશેષમત્તાઃ ।
ગચ્છન્તિ પુષ્પમનુપુષ્પમદભ્રગીત્યા
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૭॥

ત્વં ક્ષેત્રગોત્રપરિતસ્થિતઘોષયોષાઃ
મધ્નન્તિ મઙ્ગલરવં દધિચન્દ્રિકાભમ્ ।
તધ્વાન્તમુક્તતમસઃ કકુભઃ પ્રભાન્તિ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૮॥

શ્રીનિમ્બશૈલવરકન્દરમન્દિરાન્તઃ
વિદ્યોતમાન રમણીય રમાશ્રિતાઙ્ક ।
રાકાસુધાકરસહશ્ર નિભાસ્ય શોભા
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૯॥

પદ્માલયા સરસિ નિત્ય કૃતાવગાહા
શુદ્ધશ્ચ વાસવમુખા સુરભક્તસઙ્ઘાઃ ।
તિષ્ઠન્તિ દાર્વિ તવ ભૈરવભક્તરુદ્ધાઃ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૦॥

શ્રીનિમ્બશૈલ પિચુમર્થક પુણ્યભૂભૃ
નિમ્બાદ્રિ નિમ્બગિરિમાલક ગોત્રનામ્ના ।
નિત્યં વદન્તિ નિપુણાસ્તવ ગોત્રરાજં
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૧॥

દુષ્ટે સ્વપુત્રરિપુમુદ્ધતગર્વમત્તં
સ્તમ્ભે રમં કનકકશ્યપુ નામધેયમ્ ।
હર્તું નૃસિંહવપુષા સુષુષાવિરાજ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૨॥

ભક્તસ્ય વાગવિતથં સતતં પ્રકર્તું
સર્વેષુ વસ્તુષુ ચ નિત્યમદભ્રવૃત્તિમ્ ।
સન્દર્શયન્ દનુજનાલકૃતાવતાર
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૩ ॥

આદિત્યસોમકુજસૌમ્ય સુરાર્યશુક્ર
સ્વર્ભાનુકેતુમુખદિવ્યનવગ્રહાસ્તે ।
તિષ્ઠન્તિ દાસ્યમિહ કર્તુમતન્દ્રભાવાઃ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૪ ॥

માલૂરરૂપધર કાલહારૌ ચ વાયુ
રિન્દ્રોથ નૈરૃતિમુખાઃ કકુભીશદેવાઃ ।
તદ્વાસ્થદણ્ડહતિમણ્ડિતશીર્ષદેશાઃ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૫ ॥

ત્વત્કન્દરોપરિ લસચ્છિખરાગ્રભાગં
દૃષ્ટ્વા પ્રહૃષ્ટમનસો ભવભીતિબાધાન્ ।
ત્યક્ત્વા ભજન્તિ ભવદીય નગાધિરાજં
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૬ ॥

શ્રી ધર્મપાલનૃપવિપ્ર વિરઞ્ચિરુદ્ર
ત્રૈશઙ્કુસઙ્ગત મહાઘુ વિનાશકારિન્ ।
ભક્તૈકભોગ્ય ગુણમઙ્ગલ ધામનામન્
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૭ ॥

લક્ષ્મીનૃસિંહ નખરાયુધ વીરસિંહ
ગીર્વાણસિંહ ગિરિશાષુવિભઙ્ગવહઃ ।
દૈત્યેયજિહ કરિકુમ્ભ વિઘાતસિંહ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૮ ॥

પ્રહ્લાદપાલક પરાત્પરપાપનાશ
પિઙ્ગાક્ષ પુણ્યજન પીવર તુઙ્ગભઙ્ગ ।
પદ્માલયાર્ચિત પવિત્રપદારવિન્દ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૧૯ ॥

શ્રીમાન્ શ્રિતાર્તિહરસિન્ધુસુતામનોબ્જ
લોલમ્બ પત્રરથશઙ્ખરથાઙ્ગપાણે ।

વાત્સલ્યપૂર્ણ વરદાયક વાસુદેવ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૦॥

શ્રીમાન્નૃસિંહ સુસટાબ્દ વૃતાબ્જવક્ત્રા
દંષ્ટ્રોરુદન્તનખશસ્ત્રધરત્રિનેત્ર ।
ચઞ્ચલ્લગુદ્રસનગર્જિતનિર્જિતારે
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૧॥

વૈકુણ્ઠસીમ્નિ વિતતા વિરજા સુધોધા
લીલાવિભૂતિમધિગમ્ય પદાશ્રિતા તે ।
મોક્ષપ્રદેતિ વિદિતા રુચિરપ્રવાહ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૨॥

શ્રીબેમુગલ્પુરસમાગતવેદરૂપાઃ
તે માધ્વવૈષ્ણવગણાઃ શતશો વસન્તિ ।
નેત્ત્વા પયોધ કમલાલમલા કરીચ્યં
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૩॥

લક્ષ્મીપતે નરહરે નખદંષ્ટ્રશાલિન્
દારિદ્ર્યદાવદહન ક્ષમકાલમેઘ ।
ભક્તાર્તિભઞ્જન બહુપ્રદશેષશાયિન્
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૪॥

પ્રહ્લાદકારિજ યતીન્દ્ર નરાદિ મૌનિ
નારાયણાનિલ તનુજવરૈશ્ચ લક્ષ્મ્યા ।
તાક્ષ્ર્યેણ ભૈરવમુનીન્દ્રગણૈશ્ચ સેવ્ય
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૫॥

કલ્યાણરૂપ કમલાશ્રિતવત્સભાગ
કન્દર્પકોટિ સુકુમાર કરાલદંષ્ટ્રા ।
કારુણ્યપૂર્ણ ઘનકૌસ્તુભરત્નહાર
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૬॥

કાર્તિકમાસશરદિન્દુ વિકાસપૂર્ણ
રાકાતિથૌ તવ રથોત્સવસેવનાય ।
પ્રત્યબ્દમબ્જભવ વૃન્દમિતોભિયાતિ
નિમ્બાદ્રિનાથ નૃહરે તવ સુપ્રભાતમ્ ॥ ૨૭॥

શ્રીનિમ્બશૈલ નૃહરેરિહ સુપ્રભાતં
લિઙ્ગાપુરીનિલય લક્ષ્મણનામકેન ।
ભક્ત્યાકૃતં પ્રતિદિનં સરસં પઠન્તિ
તેષાં દદાતિ નૃહરિર્ધનપુત્રભોગાન્ ॥ ૨૮॥

ઇતિ શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહ સુપ્રભાતં સમ્પૂર્ણમ્ ।
શ્રીલક્ષ્મીનૃસિંહાર્પણમસ્તુ ।

Proofread by M K Barman

---

*Shri Nimbadrilakshminrisimha Suprabhatam*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*